**K17U 1634**

GOVT. BRENNEN COLLEGE THALASSERY CENTRAL LIBRARY

Reg. No. : ...............................

Name : ...................................

**V Semester B.A. Degree (CBCSS – Reg./Sup./Imp.)**
**Examination, November 2017**
**(2014 Admn. Onwards)**
**CORE COURSE IN SANSKRIT**
**5B08 SKT : Sandesakavya and Champukavya**

Time : 3 Hours    Max. Marks : 40

*सूचना : सर्वे प्रश्नाः संस्कृतभाषयैव समाधेयाः ।*
*देवनागरी लिपिरूपयोक्तव्या ।*

I. क) वाक्येन वाक्याभ्यां वा **चतुर्णां** उत्तरं लिखत । **(1×4=4)**

1) मेघदूते नायकः कः ?

2) यक्षश्चक्रे – किं चक्रे ? कुत्र ?

3) संदेशार्थाः कैः प्रापणीयाः ?

4) नभसि के मेघस्य सहायाः संपत्स्यन्ते ?

5) मेघसन्देशे मुख्यो रसः कः ?

6) अलका कीदृशी भवति ?

ख) वाक्येन वाक्याभ्यां वा **चतुर्णां** उत्तरं लिखत । **(1×4=4)**

7) कैकेय्याः साहृदयमदयं मन्थरा निर्ममन्थ–किमिव ?

8) कैकेयी मामुपयमं नयतीति मन्ये – कः ?

9) कैकेय्या प्रार्थितं वरद्वयं किम् ?

10) चम्पूरामायणस्य काण्डानि कानि ?

11) कौसल्या वारयामास क्रुद्धं रामानुजानुजम् – कदा ?

12) वैवर्ण्यमाविरभवन्न कदापि वक्त्रे–कस्याः ? कदा ?

P.T.O.

II. क) द्वे व्याख्यात । (3×2=6)

13) कर्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रामवन्ध्यां
तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्काः ।
आकैलासा द्बिसकिसलयच्छेदपाथेयवन्तः
संपत्स्यन्ते नयसि भवतो राजहंसाः सहायाः ।।

14) वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां
सौधोत्सङ्ग प्रणयविमुखो मा स्म भूरुज्जदिन्याः ।
विद्युद्दामस्फुरितचकितैस्तत्र पौराङ्गनानां
लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि ।।

15) उत्पश्यामि त्वयि तटगते स्निग्धभिन्नाञ्जनाभे
सद्यः कृत्तद्विरददशनच्छेदगौरस्य तस्य ।
शोभा मद्रेःस्तिमितनयनप्रेक्षणीयां भवित्री -
मंसन्यस्ते सति हलभृतो मेचके वाससीव ।।

ख) द्वे व्याख्यात । (3×2=6)

16) नृपसुखविमुखेन स्वेन कान्तेन साकं
दुहितरि विधिपाकात् काननाय व्रजन्त्याम् ।
अकुशलमिति मत्वा नूनमह्नाय धात्री
परिजनमुखबाष्पं पांसुभिः पर्यहार्षीत् ।।

17) वनभुवि तनुमात्रत्राणमाज्ञापितं मे
सकलभुवनभारः स्थापितो वत्समूर्ध्नि ।
तदिह सुकरतायामावयोस्तर्कितायां
मयि पतति गरीयानम्ब ने पक्षपातः ।।

18) तस्मिन् क्षणे वरयुगं चिरतप्तताम्र -
नाराचवेधपरुषं श्रवसी विदार्य ।
सत्यप्रहाण चकितस्य नृपस्य काम-
मूरीचकार हृदये पुटपाकरीतिम् ।।



III. क) सप्रकरणं **द्वयोः** आशयं विशदयत । (2×2=4)

19) स्रोतोमूर्त्या भुवि परिणतां रन्तिदेवस्य कीर्तिम् ।

20) स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु ।

21) कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ।

ख) सप्रकरणं **द्वयोः** आशयं विशदयत । (2×2=4)

22) नैवापमम्बु भरतेन न मे प्रदेया ।

23) हा हन्त केकयकुले कथमाविरासीत् ?

24) निन्दिष्यते नियतमेव निमेषहानिः ।

IV. द्वे उपन्यस्यत । (6×2=12)

25) मेघस्य सञ्चारमार्गं संक्षिप्य विवृणुत ।

**अथवा**

संदेशकाव्यानां मध्ये मेघदूतस्य स्थानं निरूपयत ।

26) अयोध्यां प्रत्यायातस्य भरतस्य चेष्टितानि संगृह्णीत ।

**अथवा**

चम्पूरामायणस्य महत्वमुपपादयत ।

---